# श्रीसोमनाथसंस्कृतयुनिवर्सिटी,वेरावलम्

## सत्रान्तपरीक्षा - दिसम्बर्, २०१८

| | | |
|---|---|---|
| कक्षा-शास्त्रद्वितीयवर्षम् (SEM- 3) | **प्रश्नपत्रम्-६** | गुणा: -७० |
| विषय:-साहित्यम् | कोड- CC 2.3.6<br>(NEW SYLLABUS) | समय: - २ त: ५ |
| दिनाङ्क:-१०-१२-२०१८ | सन्दर्भग्रन्थ: - स्वप्नवासवदत्तम् - भासप्रणीतम् | |

## प्रथमान्विति:

**प्रश्न: १ द्वयो: ससन्दर्भं व्याख्या कार्या ।** १०

१ तीर्थोदकानि समिध: कुसुमानि दर्भान् स्वैरं वनादुपनयन्तु तपोधनानि ।
धर्मप्रिया नृपसुता न हि धर्मपीडामिच्छेत् तपस्विषु कुलव्रतमेतदस्या: ॥

२ पद्मावती नरपतेर्महिषी भवित्री दृष्ट्वा विपत्तिरथ यै: प्रथमं प्रदिष्टा ।
तत्प्रत्ययात् कृतमिदं न हि सिद्धवाक्यान्युत्क्रम्य गच्छति विधि: सुपरीक्षितानि ॥

३ अनाहारे तुल्य: प्रततरुदितक्षामवदन: शरीरे संस्कारं नृपतिसमदु:खं परिवहन् ।
दिवा वा रात्रौ वा परिचरति यत्नैर्नरपतिं नृप: प्राणान् सद्यस्त्यजति यदि तस्याप्युपरम: ॥

**प्रश्न: २** भासनाटकचक्रस्य परिचयं लिखन्तु । १०

**अथवा**

भासस्य परिचयपूर्वकं स्वप्नवासवदत्तस्य वैशिष्ट्यं प्रतिपादयन्तु ।

## द्वितीयान्विति:

**प्रश्न: ३ द्वयो: ससन्दर्भं व्याख्या कार्या ।** १०

१ कुञ्जरिके ! कुञ्जरिके ! कुत्र कुत्र भर्तृदारिका पद्मावती ? किं भणसि,एषा भर्तृदारिका
माधवीलतामण्डपस्य पार्श्वत: कन्दुकेन क्रीडतीति । यावद्भर्तृदारिकामुपसर्पामि ।

२ वासवदत्ता- अस्त्युज्जयिनीयो राजा प्रद्योतो नाम । तस्य परिमाणनिर्वृत्तं नामधेयं महासेन इति
चेटी- भर्तृदारिका तेन राज्ञा सह सम्बन्धं नेच्छति ।

३ धात्री-नहि नहि अन्यप्रयोजनेनेहागतस्याभिजनविज्ञानवयोरूपं दृष्ट्वा स्वयमेव महाराजेन दत्ता ।

**प्रश्न: ४** द्वितीयाङ्कस्य साराशं लिखन्तु । १०

अथवा

उदयनस्य चरित्रचित्रणं कुरुत

## तृतीयान्वितिः

**प्रश्नः ५** **निम्नलिखितेषु द्वयोः ससन्दर्भं व्याख्या कार्या ।** **१०**

१ विवाहमोदसङ्कुले अन्त:पुरचतु:शाले परित्यज्य पद्मावतीमिहागतास्मि । यावदिदानीं भागधेयनिर्वृत्तदु:खं विनोदयामि । अहो अत्याहितम् आर्यपुत्रोऽपि नाम परकीयः संवृत्तः

२ क्व नु खलु गता आर्यावन्तिका ? अम्मो ! इयं चिन्ताशून्यहृदया नीहारप्रतिहतचन्द्रलेखेवा – मण्डितभद्रकं वेषं धारयन्ती प्रियङ्गुशिलापट्टके उपविष्टा । यावदुपसर्पामि ।

३ अस्माकं भट्टिनी भणति –महाकुलप्रसूता स्निग्धा निपुणेति इमां तावत् कौतुकमालिकां गुम्फत्वार्या ।

**प्रश्नः ६** तृतीयाङ्कस्य साराशं लिखन्तु । १०

अथवा

वासवदत्तायाः चरित्रचित्रणं कुरुत ।

## चतुर्थान्वितिः

**प्रश्नः ७** दशप्रश्नानां एकवाक्येन उत्तराणि लिखत । १०

१ स्वप्नवासवदत्तस्य मङ्गलाचरणं कस्मिन् छन्दसि ?

२ स्वप्नवासवदत्तस्य रचयिता कः ?

३ चक्रारपंक्तिरिव गच्छति भाग्यपंक्तिः इयं सूक्तिः कस्मिन् अङ्के वर्तते ?

४ नाटके मन्त्रिणः नाम किमस्ति ?

५ भासस्य कति नाट्यग्रन्थाः उपलभ्यन्ते ।

६ स्वप्नवासवदत्तस्य नायिका का ?

७ स्वप्नवासवदत्ते कति अङ्काः सन्ति ?

८ पद्मावतीकस्य पुत्री अस्ति ?

९ स्वप्नवासवदत्तस्य नायकः कः ?

१० स्वप्नवासवदत्तस्य विदूषकः कः?

११ वासवदत्ता कस्य पुत्री ?

१२ प्रथमाङ्के कति श्लोकाः ?

१३ प्रद्वेषो बहुमानो वा इत्युक्तिः कस्मिन् अङ्के ?

१४ दु:खं न्यासस्य रक्षणम् इत्युक्तिः कस्मिन् अङ्के ?

१५ लावाणकग्रामस्य छात्रः कः ?